http://www.sgbauonline.com/



# M.A. (Part—I) Sanskrit (Semester—II) Examination

## SANSKRIT

## Paper—5

## (Vedic Literature)

समयः — होरात्रयम्] [पूर्णाङ्कः — 80

**सूचना** :—उत्तराणि स्वीकृतमाध्यमेन लिखत।

**(ऋग्वेदे)**

1. (अ) कयोरपि **द्वयोः** ऋचोः सविवरणम् अनुवादं कुरुत : 6

(1) येनेमा विश्वा च्यवना कृतानि
यो दासं वर्णमधरं गुहाकः।
श्वघ्नीव यो जिगीवाँ लक्षमाद —
दर्यः पुष्टानि स जनास इन्द्रः।।

(2) ऋतस्य बुध्न उषसामिषण्यन् —
वृषा मही रोदसी आ विवेश।
मही मित्रस्य वरुणस्य माया
चन्द्रेव भानुं वि दधे पुरुत्रा।।

(3) प्र वाता वान्ति पतयन्ति विद्युत —
उदोषधीर्जिहते पिन्वते स्वः।
इरा विश्वस्मै भुवनाय जायते
यत्पर्जन्यः पृथिवीं रेतसावति।।

(ब) सविस्तरम् उत्तरं लिखत :— 10

इन्द्रदेवतायाः वर्णनं कुरुत।

**अथवा**

उषादेवतायाः सविस्तरं वर्णनं कुरुत।

**(यजुर्वेदे च अथर्ववेदे)**

2. (अ) कयोरपि **द्वयोः** ऋचोः सविवरणम् अनुवादः कुरुतः 6

(i) सप्त चक्रान् वहति काल
एष सप्तास्य नाभीरमृतं न्वक्षः।
स इमा विश्वा भुवनान्यञ्जत् कालः
स ईयते प्रथमा नु देवः ।।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(ii) येन कर्माण्यपसो मनीषिणो

यज्ञे कृण्वन्ति विदथेषु धीराः।

यदपूर्वं यक्षमन्तः प्रजानां

तन्मे मनः शिवसंकल्पमस्तु।।

(iii) यस्यामापः परिचराः समानी

रहोरात्रे अप्रमादं क्षरन्ति।

सा नो भूमिर्भूरिधारा पयो --

दुहा मथो उक्षतु वर्चसा।।

(ब) सविस्तरम् उत्तरं लिखत : 10

पृथ्वीदेवतायाः सविस्तरं वर्णनं कुरुत।

अथवा

शिवसंकल्पसूक्तस्य सारं लिखत।

(पाणिनीयशिक्षायाम्)

3. (अ) **एकस्य** प्रश्नस्य सविस्तरम् उत्तरं लिखत : 10

स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः।

इति वर्णविदः प्राहुर्निपुणं तन्निबोधत।।

स्पष्टी कुरुत।

अथवा

चतुः षष्टिवर्णानाम् विवेचनं कुरुत।

(ब) टिप्पणीद्वयं लिखत :– 6

(1) प्रयत्नद्वयम्।

(2) अर्धमात्रा तु कण्ठस्य।

(3) पाठकाधमाः।

(4) शिक्षा घ्राणं तु वेदस्य।

(निरुक्ते)

4. (अ) **त्रयाणां** वाक्यानां ससंदर्भं स्पष्टीकरणं कुरुत :– 12

(1) अथ चेत् सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्वं तथा चक्षीरन्।

(2) अथापि सत्त्वपूर्वो भाव इत्याहुः।

(3) अर्थवन्तः शब्दसामान्यात्।

(4) यथा एतददितिः सर्वमिति।

(5) स्थाणुस्तिष्ठते अर्थोऽर्तेररणस्थो वा।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(ब) निरुक्तानुसारेण निर्वचनं कुरुत (कयो: द्वयो:) : 4

(1) भीम: (2) पर्वत:

(3) गिरि: (4) स्थाणु:

5. उचितं पर्यायं चित्वा लिखत (केऽपि षोडश) :— 16

(1) गृहस्थाश्रमस्य आचारसंहिता कुत्र वर्णिता ?

(1) आरण्यके (2) वेदे

(3) गृह्यसूत्रे: (4) व्याकरणे

(2) गृह्यसूत्रं 'प्राचीन भारतस्य वार्तापत्रम्' इति केन संबोधितम् ?

(1) मॅकडोनेल: (2) ग्रिफीत:

(3) सायणाचार्य: (4) विंटरनिट्ज:

(3) शूल्वसूत्रस्य योगदानं कुत्र भवति ?

(1) यज्ञे (2) गृहे

(3) अरण्ये (4) तपाचरणे

(4) जामित्या: मूलं कुत्रास्ति ?

(1) गृह्यसूत्रे (2) ब्रह्मसूत्रे

(3) शूल्बसूत्रे (4) पार्षद् सूत्रे

(5) ऋग्वेदस्य कति कल्पसूत्रे स्त: ?

(1) द्वे (2) पंच

(3) षट् (4) नव

(6) लक्ष्यलक्षणे किम् ?

(1) निरुक्त: (2) कल्प:

(3) व्याकरणम् (4) शिक्षा

(7) महाभाष्यकार: क: अस्ति ?

(1) पतञ्जलि: (2) कात्यायन:

(3) पाणिनी (4) यास्क:

(8) महर्षिणाकात्यायनेन कति छन्दांसि उल्लेखितानि ?

(1) षट् (2) सप्त

(3) अष्ट (4) नव

(9) निघण्टु: नाम किम् ?

(1) वैदिक शब्दकोश: (2) व्याकरणकोश:

(3) नीतिकोश: (4) सुभाषितकोश:



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(10) निघण्टु-ग्रन्थस्य कति काण्डानि सन्ति ?

(1) त्रीणि (2) चत्वारि

(3) षट् (4) दश

(11) ऋग्वेदे कति मण्डलानि सन्ति ?

(1) दश (2) द्वादश

(3) षोडश (4) विंशति.

(12) यजुर्वेदस्य अपरं नाम किम् ?

(1) शास्त्रग्रन्थः (2) व्याकरणग्रन्थः

(3) उपनिषद् (4) पद्धतिग्रन्थः

(13) सामसंहितायाः कति विभागाः ?

(1) द्वौ (2) त्रयः

(3) पञ्च (4) अष्ट

(14) अग्निप्रकाराः कति सन्ति ?

(1) त्रयः (2) चत्वारः

(3) सप्त (4) नव

(15) ईशावास्योपनिषदि वर्ण्यविषयः कः ?

(1) पुण्यफलवर्णनम् (2) दैवफलवर्णनम्

(3) कर्मफलवर्णनम् (4) ज्योतिषफलवर्णनम्

(16) गोपथब्राह्मणे अध्यायस्य नाम किम् ?

(1) प्रपाठकः (2) वाचकः

(3) लेखकः (4) विवेचकः

(17) अथर्वसंहितायाः कति काण्डानि सन्ति ?

(1) सप्तदश (2) अष्टादश

(3) विंशतिः (4) एकविंशतिः

(18) यम नचिकेतस्य आख्यानं कुत्र वर्णितमस्ति ?

(1) केनोपनिषदि (2) कठोपनिषदि

(3) ईशावास्योपनिषदि (4) मुण्डकोपनिषदि

(19) वेदोक्त कर्मणाम् व्याख्या कुत्र कृता ?

(1) कल्पसूत्रे (2) शिक्षायां

(3) निरुक्ते (4) व्याकरणे

(20) निघण्टुग्रन्थस्य भाष्यस्य नाम किम् ?

(1) निघण्टुनिर्वचनम् (2) नैगमः

(3) शब्दार्थो (4) विवरणम्



http://www.sgbauonline.com/